# dashAvatArastotram 3

# દશાવતારસ્તોત્રમ્ ૩

## Document Information

Text title : dashAvatArastotram 3

File name : dashAvatArastotram3.itx

Category : vishhnu, dashAvatAra, shankarAchArya, vishnu

Location : doc_vishhnu

Author : Shankaracharya

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : June 5, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# દશાવતારસ્તોત્રમ્ ૩

ચલલ્લોલકલ્લોલકલ્લોલિનીશસ્ફુરન્નક્રચક્રાતિવક્ત્રામ્બુલિનઃ ।
હતો યેન મીનાવતારેણ શઙ્ખઃ સ પાયાદપાયાજ્જગદ્વાસુદેવઃ ॥ ૧॥

ધરાનિર્જરારાતિભારાદપારાદકૂપારનીરાતુરાધઃ પતન્તી ।
ધૃતા કૂર્મરૂપેણ પૃષ્ઠોપરિષ્ટે સદેવો મુદે વોસ્તુ શેષાઙ્ગશાયી ॥ ૨॥

ઉદગ્રે રદાગ્રે સગોત્રાપિ ગોત્રા સ્થિતા તસ્થુષઃ કેતકાગ્રે ષડઙ્ઘ્રેઃ ।
તનોતિ શ્રિયં સશ્રિયં નસ્તનોતુ પ્રભુઃ શ્રીવરાહાવતારો મુરારિઃ ॥ ૩॥

ઉરોદાર આરમ્ભસંરમ્ભિણોસૌ રમાસમ્ભ્રમાભઙ્ગુરાગ્રૈર્નખાગ્રૈઃ ।
સ્વભક્તાતિભક્ત્યાભિવ્યક્તેન દારુણ્યઘૌઘં સદા વઃ સ હિંસ્યાન્નૃસિંહઃ ॥ ૪॥

છલાદાકલય્ય ત્રિલોકીં બલીયાન્ બલિં સમ્બવન્ધ ત્રિલોકીબલીયઃ ।
તનુત્વં દધાનાં તનું સન્દધાનો વિમોહં મનો વામનો વઃ સ કુર્યાત્ ॥ ૫॥

હતક્ષત્રિયાસૃક્પ્રપાનપ્રનૃત્તમમૃત્યત્પિશાચપ્રગીતપ્રતાપઃ ।
ધરાકારિ યેનાગ્રજન્માગ્રહારં વિહારં ક્રિયાન્માનસે વઃ સ રામઃ ॥ ૬॥

નતગ્રીવસુગ્રીવ-સામ્રાજ્યહેતુર્દશગ્રીવ-સન્તાન-સંહારકેતુઃ ।
ધનુર્યેન ભગ્નં મહત્કામહન્તુઃ સ મે જાનકીજાનિરેનાંસિ હન્તુ ॥ ૭॥

ધનાદ્ગોધનં યેન ગોવર્ધનેન વ્યરક્ષિ પ્રતાપેન ગોવર્ધનેન ।
હતારાતિચક્રી રણધ્વસ્તચક્રી પદધ્વસ્તચક્રી સ નઃ પાતુ ચક્રી ॥ ૮॥

ધરાબદ્ધપદ્માસનસ્થાઙ્ઘ્રિયષ્ટિર્નિયમ્યાનિલં ન્યસ્તનાસાગ્રદૃષ્ટિઃ ।
ય આસ્તે કલૌ યોગિનાં ચક્રવર્તી સ બુદ્ધઃ પ્રબુદ્ધોઽસ્તુ નિશ્ચિન્તવર્તી ॥ ૯॥

દુરાપારસંસારસંહારકારી ભવત્યશ્વવારઃ કૃપાણપ્રહારી
મુરારિર્દશાકારધારીહ કલ્કી કરોતુ દ્વિષાં ધ્વંસનં વઃ સ કલ્કી ॥ ૧૦॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં દશાવતારસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*dashAvatArastotram 3*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*